# कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः

কুমাৰ ভাস্কৰ বৰ্মা সংস্কৃত আৰু পুৰাতন অধ্যয়ন বিশ্ববিদ্যালয়

Kumar Bhaskar Varma Sanskrit & Ancient Studies University

Namati, Nalbari-781337

Website:www.kbvsasun.ac.in :: Email Id:kbvsasun@rediffmail.com

# प्रतिवेदनम्

# REPORT





## द्वादश-प्रतिष्ठादिवस-समारोहः

## FOUNDATION DAY CELEBRATION

**25-05-2023**

## द्वादश-प्रतिष्ठादिवस-समारोहः

### दिनाङ्कः 25-05-2023

**भारतस्यैतिह्यसंस्थापकेषु पूर्वोत्तरराज्येषु अन्यतमस्य असमप्रदेशस्य विशिष्टसंस्कृतविदुषां जनिभूतस्य नलबारीति नगरस्य "नमाटि" इत्यस्मिन् पुण्यभूमौ संस्थापितस्य कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयस्य द्वादश प्रतिष्ठादिवससमारोहः समायोजितः। समारोहस्य विस्तृतविवरणं प्रस्तूयते यथा-**

माननीयानां राज्यपालमहोदयानां निर्देशानुसारम् असमसर्वकारः संस्कृतविश्वविद्यालयस्य स्थापनार्थं **25-05-2011** इति दिनाङ्के राजपत्रस्य प्रकाशनमकरोत्। राजपत्रानुसारं नलबारीमण्डलस्य **"नमाटि"** इत्यस्मिन् स्थाने **"कुमारभास्करवर्मसंस्कृतपुरातनाध्ययन-विश्वविद्यालयः"** इति नाम्ना विश्वविद्यालयस्य स्थापनमभूत्। असमसर्वकारेण प्रकाशितस्य राजपत्रस्य दिनाङ्कानुसारं मेमासस्य पञ्चविंशतिदिनाङ्के विश्वविद्यालयस्य प्रतिष्ठादिवससमारोहः आचर्यते। एतदनुमतम् अस्मिन् वर्षेऽपि माननीयानां कुलपतिवर्याणां **आचार्यप्रह्लाद रा.जोशि**महोदयानाम् आध्यक्षत्वे **25-05-2023** इति दिनाङ्के **द्वादश प्रतिष्ठादिवससमारोहः** विश्वविद्यालयप्राङ्गणे समायोजितः।

समारोहेऽस्मिन् असमसर्वकारस्य शिक्षामन्त्रिणः **डॉ.रनोजपेगु**महोदयाः, केबिनेटमन्त्रिणः **श्रीमज्जयन्तमल्लबरुवा**महोदयाः, शिक्षोपदेष्टारः **प्रो. ननीगोपालमहन्त**महोदयाश्च समाहुता आसन्। परन्तु असमसर्वकारस्य विशेषकार्यक्रमवशात् ते आगमनेऽसमर्थाः। समारोहे पाठशालास्थस्य भट्टदेवविश्वविद्यालयस्य सम्माननीयाः कुलपतयः **प्रो.बिरिञ्चिकुमारदास**महोदयाः प्रमुखातिथिरूपेण उपस्थिता आसन्।

## Foundation Day Celebration

### Date:25-05-2023

**The 12th Foundation Day Celebration of Kumar Bhaskar Varma Sanskrit and Ancient Studies University, established in the holy land of Namati in Nalbari, the birthplace of distinguished Sanskrit scholars of Assam, carrier of Indian Cultural Heritage in the northeastern states of India, was held. A detailed description of the ceremony is presented:**

As per the direction of the Hon'ble Governor, the Government of Assam issued the Gazette on 25-05-2011 for the establishment of Sanskrit University. According to the Gazette, a university was established at "Namati" in Nalbari district under the name of **"Kumar Bhaskar Varma Sanskrit and Ancient Studies University"**. According to the date of the Gazette published by the Government of Assam, the Foundation Day of the University is celebrated on the 25th May every year. With this notification, the 12th Foundation Day celebration was held at the University on 25-05-2023 under the chairmanship of Hon'ble Vice-**Chancellor Prof. Pralhad R. Joshi.**

**Dr. Ranoj Pegu**, Minister of Education, Government of Assam, **Shri Jayant Malla Baruah**, Cabinet Minister and **Prof. Nani Gopal Mahanta**, Education Advisor were also invited. However, they were unable to come due to special programs of the government of Assam. Honorable Vice-Chancellor of Bhattadev University, Pathsala, **Prof. Birinchi Kumar Das** was the chief guest at the function.

सभायां विश्वविद्यालयस्य शैक्षिकपरिषत्सदस्याः **डॉ.परेशनाथशर्म- डॉ.नकुलचन्द्रडेका-श्रीहरिनारायणदासाः**, कृष्णकान्तसन्दिकैसर्वकारीय-संस्कृतमहाविद्यालयस्य प्राचार्याः **डॉ.विनिताभागवती**, विश्वविद्यालयस्य परीक्षानियन्त्रकचराः विशेषकार्याधिकारीचराश्च **डॉ.दीनमणिभागवती**वर्याश्च अतिथित्वेन समाहुता आसन्।

समारोहस्यारम्भः दीपप्रज्वालनेनाभूत्। तदनन्तरं छात्राः सुमधुरवेदध्वनिना वातावरणशुद्धकारकं समारोहविघ्ननिवारकञ्च वैदिकं मङ्गलाचरणम् अकुर्वन्। मङ्गलाचरणानन्तरं समारोहे समुपस्थितानां जनानाम् अतिथीनाञ्च वाचिकं स्वागतं समारोहस्यायोजनस्योद्देश्यञ्च अप्रस्तुवन् विश्वविद्यालयस्यास्य कुलपतयः **आचार्याः प्रह्लाद रा.जोशि**महोदयाः।

तदनन्तरं प्रभारप्राप्तैः कुलसचिवैः **डॉ.मदनचन्द्रबोरो**महाभागैः सभासमक्षं समारोहस्य विषयोपस्थापनं समुपस्थापितम्।

कुलसचिवानाम् उद्बोधनानु मञ्चस्थानां प्रमुखातिथिप्रभृतीनाम् अतिथीनां सम्मानं कुलपतिमहोदयैः विहितम्।

अतिथीनां सम्मानानान्तरं **विश्वविद्यालयस्य नूतनान्तर्जालपुटस्य व्याकरण-न्याय-सर्वदर्शनेति विभागत्रयस्य** च समुद्घाटनञ्च प्रमुखातिथयः अकुर्वन्।

कार्यक्रमस्याग्रिमे क्रमे विश्वविद्यालये संस्थापितस्य संस्कृतविकासकेन्द्रस्य छात्राः संस्कृतनाटकमाध्यमेन केन्द्रस्य परिचयं संस्कृतगीतञ्च प्रस्तुतवन्तः। अस्मिन्नेव क्रमे संस्कृतविकासकेन्द्रस्य नामकरणं **कनकलताबरुवासंस्कृतबालकेन्द्रम्** इत्यभूत्।

अस्मिन्नवसे नलबारीस्थानां संस्कृतविदुषां सम्माननकार्यक्रमोऽपि आयोजितः। एतदर्थं नलबारीमण्डलानां प्रायः पञ्चविंशति संस्कृतविदुषां नामानि संगृह्य तेषु वयोवृद्धानाम् एकादशानां पण्डितानां

**Dr. Paresh Nath Sarma**, **Dr. Nakul Chandra Deka** and **Sri Harinarayan Das**, members of the Academic Council of the University, **Dr. Binita Bhagawati**, Principal of Krishna Kant Handiqui Government Sanskrit College, **Dr. Dinamoni Bhagawati**, Ex. Controller of Examinations and OSD of the University were invited as guests.

The ceremony began with the lighting of lamps. Afterwards, the students Chanted Vedic Mangalacharana with the melodious sound of the Vedas with the hope of purifing the atmosphere and preventing disruption of the ceremony. After the Mangalacharana, the Vice-Chancellor of the University, Acharya Prahlad R. Joshi, gave a verbal welcome to the people and guests present at the function and presented the objectives of the function.

Thereafter, Dr. Madan Chandra Boro, the Registrar (I/C) of the University presented the theme of the function before the assembly.

After the address of the Registrar, the Vice-Chancellor initiated the honoring of the guests such as the Chief Guest on the stage.

After honoring the guests, the chief guests also inaugurated the new website of the University and three departments Vyakarana, Nyaya and Sarvadarshan.

In the early stage of the programme, students of the **Sanskrit Vikash Kendra** established at the University, presented an introduction of the Center and Sanskrit songs through Sanskrit drama. It was in this context that the Sanskrit Vikash Kendra was renamed **Kanakalata Boruah Sanskrit Bala Kendram.**

A program of honoring Sanskrit scholars

सम्माननार्थं चयनं कृत्वा प्रशस्तिपत्र-स्मृतिचिह्न-अङ्गवस्त्रादिभिः सह **कुमारभास्करवर्मसंस्कृतसेवा-सम्मानमि**ति सम्माननं विश्वविद्यालयेन सामोदं प्रदत्तम्। सम्मानितानां विदुषां नामानि यथा-

1. **श्रीमान् अनिरुद्धदेवशर्मा**
2. **श्रीमान् दिनेशचन्द्रशर्मा**
3. **श्रीमान् अच्युतचन्द्रमिश्रः**
4. **डॉ. श्रीकान्तशर्मा**
5. **श्रीमान् केशवशर्मा**
6. **डॉ. थानेश्वरशर्मा**
7. **श्रीमान् अरुणचन्द्रशर्मा**
8. **डॉ. वसन्तकुमारदेवगोस्वामी**
9. **श्रीमान् थानेश्वरगोस्वामी**
10. **श्रीमान् दीनानाथदेवशर्मा**
11. **डॉ. नृपेन्द्रनाथशर्मा**

एतेषु अनिरुद्धदेवशर्ममहोदयाः स्वास्थ्यकारणाद् वयःकारणाच्च सभायामनुपस्थिताः आसन्। तथापि तस्मिन्नेव दिने विश्वविद्यालयपक्षतः केचन अध्यापकाः गृहं गत्वा तेभ्यो विद्वद्भ्यः सम्मानं समर्पितवन्तः।

प्रमुखातिथिभिः **प्रो.बिरिञ्चिकुमारदास**महोदयैः स्वभाषणे संस्कृतस्य महत्त्वं संस्कृतविश्वविद्यालयस्य उद्देश्यञ्च समुपस्थापितम्।

समारोहेऽस्मिन् **डॉ.दीनमणिभागवती**महोदयैः विश्वविद्यालयस्योत्कर्षाय नलबारीमण्डलजनानां परं कर्त्तव्यमिति स्वगाम्भीर्यपूर्णं भाषणं प्रदत्तम्।

सभायाः अन्ते समागतानां समेषां धन्यवादज्ञापनं समारोहस्यायोजनसमितेः संयोजिका शिक्षाविभागस्याध्यक्षा च **डॉ.अलकादास**महोदया कृतवती। सभायाः सञ्चालनं समारोहस्य सहसंयोजकः, आन्तरिकगुणवत्ताश्वासनकेन्द्रस्य निदेशकः, व्याकरणविभागाध्यक्षश्च डॉ.चिरञ्जीवीअधिकारिमहोदयः अकार्षीत्।

from Nalbari was also held on this occasion. For this purpose, the University collected the names of about twenty-five Sanskrit scholars from Nalbari districts and selected eleven elderly Pandits to honor them. The names of the honored scholars are as follows:

**1. Shri Aniruddha Deva Sarma**
**2. Shri Dinesh Chandra Sarma**
**3. Shri Achyut Chandra Mishra**
**4. Dr. Srikant Sarma**
**5. Shri Keshav Sarma**
**6. Dr. Thaneshwar Sarma**
**7. Shri Arun Chandra Sarma**
**8. Dr. Basanta Kumar Dev Goswami**
**9. Shri Thaneshwar Goswami**
**10. Shri Dinanath Dev Sarma**
**11. Dr. Nripendra Nath Sarma**

Among these, Shri Aniruddha Dev Sarma was absent in the meeting due to old age ailments. However, on the same day, some teachers from the University visited his homes and felicitated the scholar.

In his speech, the chief guests, **Prof. Birinchi Kumar Das**, presented the importance of Sanskrit and the objectives of Sanskrit University.

At the function, **Dr. Dinamoni Bhagwati** delivered his solemn speech that it is the ultimate duty of the people of Nalbari for the uplift of this University.

At the end of the meeting, **Dr. Alaka Das**, Coordinator of the function and Head of the Department of Education, offered vote of Thanks and expressed her gratitude to guests and all the participants. The meeting was conducted by **Dr. Chiranjeevi Adhikari**, Assistant Coordinator of the function and Director of IQAC and Head of Department of Vyakarana, KBVSAS University.

सभायां विश्वविद्यालयस्य भारप्राप्तपरीक्षानियन्त्रकाः डॉ. रणजीतकुमारतिवारिमहोदयाः, अन्ये अध्यापकाः, कर्मचारिणः, नगरवासिनः, ग्रामवासिनः, छात्राः अभिभावकाश्च समुपस्थिता आसन्।

विश्वविद्यालयप्रशासनेन समारोहस्य व्यवस्थितरूपेणायोजनार्थं विभिन्नाः समितयः संरचिता आसीत्। सर्वाभिः समितिभिः स्वं स्वं दायित्त्वं सुदृढतया निर्व्यूढम्। समारोहस्य सफलमायोजनमपि समितिसदस्यानां सत्प्रयासस्य फलमिति। एतदर्थं सर्वे समितिसदस्याः धन्यवादार्हाः।

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुखभाग्भवेत्॥**
**॥ ॐ शान्तिः शान्तिः शान्तिः॥**

The meeting was attended by the Controller of Examinations(I/C) of the University, Dr. Ranjeet Kumar Tiwary, other teachers, staff, inhabitants of the town, villagers, students and parents.


The university administration had formed various committees to organize the ceremony in an orderly manner. All the committees have firmly shouldered their respective responsibilities. The successful organization of the function is also the result of the good efforts of the committee members. All the committee members are to be thanked for this.

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुखभाग्भवेत्॥**
**॥ ॐ शान्तिः शान्तिः शान्तिः॥**


# चित्रवीथिका
# (Photo Galary)




**समारोहस्य वस्त्रफलकम् (**Programme's Banner)



**निमन्त्रणपत्रम् (Invitation Card)**



Dr. Madan Ch. Boro
Registrar, i/c

कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः

Ref. KBVSASU/ Date: 12-05-2023

**12th FOUNDATION DAY CELEBRATION**
**25TH MAY, 2023**

The following faculty members of this University are hereby entrusted with the responsibilities of different Sub-Committees as shown below for the smooth and successful conduct of the University Foundation Day on 25th May, 2023.

**1. Coordinator(s)** : Dr. Alaka Das, Coordinator
: Dr. Chiranjeevi Adhikari, Asst. Coordinator

**2. Stage Decoration** :
1. Dr. Pranabjyoti Deka, In-Charge
2. Dr. Debabrata Barai, Member
3. Mr. Ankur Jyoti Bhuyan, Member

**3. Guest Reception** :
1. Dr. Nibedita Goswami, In-Charge
2. Dr. Mallika Kalita, Member
3. Dr. Bornali Borthakur, Member
4. Dr. Maitree Goswami, Member
5. Dr. Archana Devi, Member

**4. Tea & Refreshment** **A) Guest** :
1. Dr. Ankumani Das, In-Charge
2. Ms. Arpana Ramchiary, Member
3. Mrs. Ansumwi Basumatary, Member

**B) General:**
1. Dr. Tapan Talukdar, In-Charge
2. Dr. Sayanika Deka, Member
3. Office Bearers of ***Chatra Sangh***

**5. Mangalacharan & Chorus** :
1. Dr. Kamal Lochan Atreya, In-Charge
2. Dr. Pavan Kr. Pandey, Assistant i/c
3. Dr. Ajit Bharali, In-Charge
4. Mr. Hirokjeet Roy, Member
5. Dr. Chabilal Upadhyay, Member

**6. Felicitation** :
1. Dr. Ankumani Das, In-Charge
2. Dr. Nandita Khakhlary, Member
3. Dr. Krishna Kalita, Member
4. Ms. Arpana Ramcihary, Member
5. Dr. Nabanita Sarmah, Member
6. Dr. Papori Boruah, Member

**7. Food** :
1. Dr. Ratul Bujar Baruah, In-Charge
2. Dr. Bikash Bhargab Sarma, Member
3. Dr. Pankaj Kr. Sarmah, Member
4. Dr. Gunin Saikia, Member
5. Dr. Jagendra Nath Goswami, Member

**9. Announcer :**
1. Dr. Rajeev Lochan Sharma

Registrar i/c
KBVS&AS University

**आयोजनसमितिः (Organizing Committee)**



**दीपप्रज्वालनं कुर्वाणा अतिथयः**
**(Lighting by Guests)**



**मङ्गलाचरणं कुर्वाणा छात्राः**
**( Mangalacharanam by Students)**



**भाषमाणाः कुलपतयः प्रो. प्रह्लाद आर. जोशिवर्याः**
**(Welcome Speech by Hon'ble VC Prof. Pralhad R. Joshi)**



**नूतनस्य अन्तर्जालपुटस्य समुद्घाटनं कुर्वाणा अतिथयः**
(Launching a new University's website by Guests)




**व्याकरण-न्याय-सर्वदर्शनविभागानामुद्घाटनं कुर्वाणा अतिथयः**
**(Launching Vyakarana, Nyaya & Sarvadarshana Departments by Chief Guest)**




**कनकलताबरुवासंस्कृतबालकेन्द्रस्य समुद्घाटनं कुर्वाणा अतिथयः**
**(Launching a Kanaklata Baruah Sanskrit Bala kendram by Guests)**



**संस्कृतविकासकेन्द्रस्य छात्राणां संस्कृतगीतगायनम्**
**(Sanskrit Song by the Students of SVK)**




**संस्कृतविकासकेन्द्रस्य छात्राणाम् अभिनयनम्**
**(Exhibition of Sanskrit Drama by the Students of SVK)**




**श्रीमतः अच्युतचन्द्रमिश्रस्य सम्मानं कुर्वाणा अतिथयः**
**(Shri Achyut Chandra Mishra is being felicitated by Guests)**




**श्रीमतः थानेश्वरगोस्वामिनः सम्मानं कुर्वाणा अतिथयः**
**(Shri Thaneswar Goswami is being felicitated by Guests)**




**श्रीमतः अरुणचन्द्रशर्मणः सम्मानं कुर्वाणा अतिथयः**
**(Shri Arun Chandra Sarma is being felicitated by Guests)**



**डॉ. थानेश्वरशर्मणः सम्मानं कुर्वाणा अतिथयः**
**( Dr. Thaneswar Sarma is being felicitated by Guests)**




**डॉ. बसन्तकुमारदेवगोस्वामिनः सम्मानं कुर्वाणा अतिथयः**
**( Dr. Basanta Kumar Dev Goswami is being felicitated by Guests)**




**श्रीमतः दीनानाथदेवशर्मणः सम्मानं कुर्वाणा अतिथयः**
**(Shri Dinanath Dev Sarma is being felicitated by Guests)**




श्रीमतः केशवशर्मणः सम्मानं कुर्वाणा अतिथयः

**(Shri Keshav Sarma is being felicitated by Guests)**




श्रीमतः दिनेशचन्द्रशर्मणः सम्मानं कुर्वाणा अतिथयः

**(Shri Dinesh Chandra Sarma is being felicitated by Guests)**




डॉ. नृपेन्द्रनाथशर्मणः सम्मानं कुर्वाणा अतिथयः

**(Dr. Nripendra Nath Sarma is being felicitated by Guests)**




डॉ. श्रीकान्तशर्मणः सम्मानं कुर्वाणा अतिथयः

**( Dr. Shrikanta Sarma is being felicitated by Guests)**



श्रामतः अनिरुद्धदेवशर्मणः सम्मानं कुर्वाणा अध्यापिका

**(Shri Aniruddha Deva Sarma is being felicitated by Teacher)**



जनसम्मर्दः

**( Gathering)**

# समारोहस्यायोजकानां समितिसदस्यानां चित्राणि

## (Photographs of the members of the organizing committee of the Programme)

मुख्योपदेष्टा
**(Chief Advisor)**



Prof. Pralhad R. Joshi
Hon'ble Vice Chancellor
KBVS&AS University

उपदेष्टा
**(Advisor)**



Dr. Madan Chandra Boro
Registrar (I/C)
KBVS&AS University

उपदेष्टा
**(Advisor)**



Dr. Ranjeet Kumar Tiwary
COE (I/C)
KBVS&AS University

संयोजिका
(**Coordinator**)



Dr. Alaka Das
Head, Department of Education

सहसंयोजकः
(Asstt. **Coordinator)**



Dr. Chiranjeevi Adhikari
Head(I/C), Department of Vyakarana

मञ्चसज्जीकरणसमितिः
(Stage Decoration Committee)



Dr. **Pranabjyoti Deka**



Dr. Debabrata Barai



Mr. Ankur Jyoti Bhuyan

## अतिथिस्वागतसमितिः
## (Guest Reception Committee)


Dr. Nibedita Goswami


Dr. Mallika Kalita


Dr. Bornali Borthakur


Dr. Maitreyee Goswami


Dr. Archana Devi

## अल्पाहारसमितिः
## (Tea & Refreshment Committee)


Dr. **Ankumani Das**


Ms. **Arpana Ramchiary**


Ms. **Ansumwi Basumatary**


Dr. Tapan Talukdar


Dr. Sayanika Deka

## मंगलाचरणसहगानसमितिः
## (Mangalacharana & Chorus Committee)


Dr. **Kamal Lochan Atreya**


Dr. **Pavan Kumar Pandey**


Dr. Ajit Bharali


Mr. Hirokjeet Roy


Dr. Chabilal Upadhyaya

## सम्मानसमितिः
## (Felicitation Committee)


Dr. **Ankumani Das**


Dr. **Nandita Khakhlary**


Dr. **Krishna Kalita**


Ms. Arpana Ramchiary


Dr. **Nabanita Sarmah**


Dr. **Papori Boruah**

भोजनसमितिः

(Food Committee)



Dr. **Ratul Bujar Baruah**



Dr. **Bikash Bhargab Sarma**



Dr. **Pankaj Kumar Sarmah**



Dr. **Gunin Saikia**



Shri Jogendra Nath Goswami

# Sanskrit varsity celebrates foundation day

NALBARI, May 27: The 12th foundation day of Kumar Bhaskar Varma Sanskrit and Ancient Studies Universities, Nalbari, was celebrated on May 25.

The vice chancellor of the university, Prof Prahlad R Joshi, in his welcome address, threw light on the progress of the university during the past year. On the occasion, the university authority invited 11 distinguished Sanskrit scholars and felicitated them with *phulam gamosa, sarai, seleng sador* and citations.

In the felicitation programme, Prof Birinchi Kumar Das and other distinguished persons were also present. The programme was moderated by Dr Chiranjeevi Adhikari, assistant professor, Department of Sanskrit.

The vote of thanks was delivered by Dr Madan Chandra Boro, registrar of the university. – Correspondent

# ভাস্কৰ বৰ্মা সংস্কৃত আৰু পুৰাতন বিশ্ববিদ্যালয়ৰ প্ৰতিষ্ঠা দিৱস

**'আমাৰ অসম'ৰ মহানগৰৰ বিশেষ প্ৰতিবেদক, ২৬ মে' ঃ** নলবাৰীস্থ কুমাৰ ভাস্কৰ বৰ্মা সংস্কৃত আৰু পুৰাতন অধ্যয়ন বিশ্ববিদ্যালয়ৰ দ্বাদশ প্ৰতিষ্ঠা দিৱস ২৫ মে'ত অনুষ্ঠিত হয়। এই উপলক্ষে বিশ্ববিদ্যালয়ৰ উপাচাৰ্য অধ্যাপক প্ৰহ্লাদ যোশীয়ে আদৰণি ভাষণত বিশ্ববিদ্যালয়খনৰ বিভিন্ন দিশত বিগত বৰ্ষৰ অগ্ৰগতিৰ খতিয়ান দাঙি ধৰাৰ উপৰিও উক্ত অনুষ্ঠানতেই উপাচাৰ্যই এঘাৰজন বৰেণ্য বিশিষ্ট সংস্কৃত পণ্ডিতক ফুলাম গামোছা, শৰাই, চেলেং চাদৰ আৰু মানপত্ৰেৰে সম্বৰ্ধনা জনাই। উল্লেখ্য যে বিশ্ববিদ্যালয়ৰ উপাচাৰ্যৰ উদ্যোগত সংস্কৃত ভাষাৰ বিকাশ, প্ৰচাৰ আৰু প্ৰসাৰৰ নিমিত্তে নতুনকৈ গঢ় লৈ উঠা কনকলতা বৰুৱা বাল কেন্দ্ৰৰ কণ কণ ছাত্ৰ-ছাত্ৰীসকলে সংস্কৃত ভাষাত গীত-নাট প্ৰদৰ্শন কৰে। অনুষ্ঠানত বিশিষ্ট অতিথি হিচাপে উপস্থিত থাকে পাঠশালাস্থিত ভট্টদেৱ বিশ্ববিদ্যালয়ৰ সন্মানীয় উপাচাৰ্য অধ্যাপক বিৰিঞ্চি কুমাৰ দাস। অনুষ্ঠানত শৈক্ষিক আৰু সামাজিক জীৱনৰ লগত জড়িত আন কেইবাজনো বিশিষ্ট ব্যক্তি উপস্থিত থাকে। বিশ্ববিদ্যালয়ৰ সংস্কৃত দৰ্শন বিভাগৰ সহকাৰী অধ্যাপক ড° চিৰঞ্জীৱি অধিকাৰীয়ে আঁত ধৰা অনুষ্ঠানত ধন্যবাদ জ্ঞাপন কৰে বিশ্ববিদ্যালয়ৰ পঞ্জীয়ক ড° মদন চন্দ্ৰ বড়োই।

असमप्रदेशस्य कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालये

# द्वादशतम-प्रतिष्ठा-दिवस-समारोह-कार्यक्रमः







**वार्ताहरः श्रीनिशिकान्तपाण्डेयः**

नलबारी। असम-प्रदेशस्य नलबारी जनपदस्य नमाटि इति स्थाने २५/०५/२०२३ तमे दिनाङ्के कुमार-भास्कर-वर्मसंस्कृत-पुरातनाध्ययन-विश्व-विद्यालयस्य द्वादशतम-प्रतिष्ठादिवस-समारोह-कार्यक्रमः सुसम्पन्नः। विश्व-विद्यालयस्यास्य कुलपति-वर्याणां प्रो. प्रह्लाद-रा-जोशी-महोदयानाम् आध्यक्षत्वे समायोजितेऽस्मिन् कार्यक्रमे मुख्यातिथि-रूपेण समुपस्थिताः आसन् भट्टदेव-विश्वविद्यालयस्य कुलपतयः डॉ. विरिञ्चिकुमारदासमहाभागाः। अन्ये च डॉ.विनीताभागवती-डॉ. परेशनाथ-शर्म-डॉ.नकुलचन्द्रडेका-डॉ. दीनमणिभागवती- श्रीहरिनारायणदास-प्रभृतयो विद्वत्तल्लजा अपि अतिथिरूपेण समुपस्थिताः आसन्। प्रारब्धेऽस्मिन् कार्यक्रमे वैदिकमङ्गलाचरणम् अभूत्।

तदन्तरं विश्वविद्यालयस्य संस्कृत-विकास-केन्द्रस्य लघुबालाः गीत-नाटकादीनां परिवेशनम् अकुर्वन्। कार्यक्रमेऽस्मिन् अत्र कार्यक्रमस्य प्रारम्भे कुलसचिवैः डॉ. मदनचन्द्रवोरोमहाभागैः समारोहस्य उद्देश्यम् उपस्थापितम्। तत्र मुख्यभापणे मुख्यातिथिः रूपेण संस्कृतस्य महत्त्वं समुपस्थापितम् डॉ. विरिञ्चिकुमारदासमहोदयैः।

अस्मिन् कार्यक्रमे विश्वविद्यालय-परिवारेण नलबारी-जनपदस्य एकादश-संस्कृत-विद्वद्भ्यः "कुमार-भास्करवर्म-संस्कृतसेवा-सम्मानम्" इति सम्मानं प्रदत्तम्। अस्मिन्नेव कार्यक्रमावसरे त्रयाणां न्याय-व्याकरण-सर्वदर्शनविभागानां, विश्वविद्यालयस्य नूतनजालपुटस्य च समुद्घाटनं जातम्। अपि च संस्कृतविकासकेन्द्रस्य नामकरणं कनकलतावरूवासंस्कृतविकासकेन्द्रमिति जातम्। कार्यक्रमेऽस्मिन् समुपस्थिताः आसन् विश्वविद्यालयस्यास्य कुलसचिवाः डॉ.मदनचन्द्रवडोमहाभागाः(प्रभारी), परीक्षानियंत्रकाः डॉ. रणजीतकुमारतिवारीमहोदयाः, अन्ये च प्राध्यापकाः, कर्मचारिणः, छात्राः, शोधच्छात्राः, ग्रामवासिननागरिकाः, अभिभावकाश्च। अन्ते धन्यवाद-ज्ञापनमकुर्वन् समारोहः संयोजिकाः डॉ. अलकादास-महोदयाः। कार्यक्रमोऽयं सुसञ्चालितः डॉ.चिरञ्जीवी-अभिकारि-महाभागैः। अस्मिन् कार्यक्रमे प्रायः २२१ जनाः आसन्।